लट०। २राहौ च तस्यच्छायारूपत्वेन तथात्वम्। ततः शिवा० अपत्ये अण्। नाभाक तदपत्ये पुंस्त्री०।

**नभोग** त्रि० नभोगच्छति गम—ड। १नभश्चरे खगदेवपक्ष्यादौ २लग्नतोदशमगे ३दशममन्वन्तरीये सप्तर्षिभेदे नभसशब्दे दृश्यम्।

**नभोगज** पु० नभसि गज इव। मेघे त्रिका०।

**नभोगति** स्त्री ७त०। १गगनगतौ नभसि गतिरस्य। २खगादौ त्रि० [तद्गणोक्तौ।

**नभोद** पु० विश्वदेवभेदे "उष्णीनाभो नभोदश्च" हरिवं०७अ०

**नभोदुह** पु० नभसि दुह्यति दुह—क। १मेघे शब्दमाला। तस्य नभसि पयोनिःसारकत्वेन तथात्वम्।

**नभोद्वीप** पु० नभसि द्वीप इव। मेघे शब्दमा०।

**नभोधूम** पु० नभसि धूम इव। मेघे शब्दमाला।

**नभोनदी** स्त्री ६त०। स्वर्गगङ्गायाम्। [स्वर्ये हेमच०।

**नभोमणि** पु० नभसि मणिरिव प्रकाशकत्वात्। द्युमणौ

**नभोमण्डल** न० नभोमण्डलमिव। गगनमण्डले "नैतन्नभो मण्डलमम्बुराशेः" सा०द० "अथ च यावन्नभोमण्डलं सह-द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन सह भुञ्जीतम्" भाग० ५।२२।९।

**नभोमण्डलदीप** पु० नभोमण्डले दीप इव रात्रौ प्रकाशकत्वात्। चन्द्रे "नभोमण्डलदीपाय शिरोरत्नाय धूर्जटेः। कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे" ति०त०

**नभोऽम्बुप** पुंस्त्री नभसि अम्बु पिबति पा—क। चातकखगे हेमच०। स्त्रियां जातित्वात् ङीष्।

**नभोरजस्** न० नभसि रज इव दृष्ट्यावरकत्वात्। अन्धकारे

**नभोरूप** त्रि० नभसो रूपमारोपितं रूपमिव रूपमस्य। नीलवर्णयुक्ते पश्वादौ "अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति" शा०भा० "खनीखनीलिमा" नैष० उक्तेः गगनस्यारोपितरूपवत्त्वेन तत्तुल्यरूपत्वात् श्याममालिन्यवर्णयुक्तस्य तथात्वम्। "नभोरूपाः पार्जन्याः" यजु०२४।६०। "नभोवर्णा नीलवर्णाः" वेददी०। [त्रिका०

**नभोरेणु** स्त्री नभसि रेणुरिव आवरकत्वात्। कुज्झटिकायां

**नभोलय** पु०नभसि लीयते ली—अच् ७त०। १धूमे शब्दरत्ना० २गगनलीनमात्रे त्रि०।

**नभोवीथी** स्त्री नभसि वीथीव। आकाशस्थे वीथीरूपे पथि। "अथ च यावतार्द्धेन नभोवीथ्याः प्रचरति तं कालमयनमाचक्षते" भाग० ५।२२।८।

**नभौकस्** त्रि०नभ आकाशम् ओकः स्थानमस्य। अन्तरिक्षचरे खगादौ "अन्ये च विविधा जीवा जलस्थलनभौकसः। पहर्त्तकेतवस्तारास्तडितःस्तनयित्नवः" भाग० २।६।१५

**नभ्य** त्रि० नाभये रथचक्रावयवभेदायहितम् तामर्हति वा गवादि० यत् "नाभिर्नभञ्च" पा० ग० नभादेशः। रथादिचक्रावयवर्हिते १तैलादौ २तदर्हे च "तदेतन्नभ्यं यदयमात्मा" शत० ब्रा० १४।४।२।२२ "तदेव रथचक्रदृष्टान्तेन स्पष्टयति नाभिश्चक्रपिण्डिका नाभ्यै हितं नाभिमर्हतीति वा नभ्यम् तदेतल्लोके प्रसिद्धं चक्रपिण्डिकास्थानीयम्, किं तत् यदयमात्मा योऽयं शरीरम्" भा०। ३अक्षे ४रथचक्रानुगुणे अञ्जने च। "नभ्योऽक्षः नभ्यमञ्जनं रथचक्रनाभावेवेदम्" सि०कौ०। "नभ्योऽक्ष इति सच्छिद्रो रथाङ्गावयवो नाभिस्तदनुप्रविष्टः काष्ठविशेषोऽक्षः स च तदनुगुणत्वात् नाभये हितः। अञ्जनं तैलाभ्यङ्गः तदपि स्नेहमयत्वात् नाभये हितम्" मनो०। शब्दकल्पद्रुमे नभ्यशब्दस्य नभःप्रकृतिकत्वेन साधनमन्यार्थपरत्वकथनञ्च निर्मूलम्। "पश्चादुत्तरवेदेस्त्रिषु प्रक्रमेषु मत्वा वा नभ्यस्थे अभिमन्त्रयतेऽक्रमेयामिति" कात्या०श्रौ०८।४।५ "मध्यमं चक्रस्य फलकं नभ्यम् "नाभिर्नभं चेति" प्रत्ययसंनियोगेन नाभेर्नभभावः नभ्ये तिष्ठतो नभ्यस्थे मध्यमे च फलके स्थापयेदित्यर्थः" कर्कः।

**नभ्राज्** पु० न भ्राजति भ्राज—क्विप् नभ्राण्नपात्" इत्यादिना पा०नञः प्रकृतिभावः। मेघे हेमच०पदत्वे षत्वडत्वे

**नमत** त्रि० नम—अतच्। प्रह्वे १नम्रे २नटे च ३धूमे उणा०। कर्मणि अतच्। ४प्रभौ उणादिकोषः।

**नमयिष्णु** त्रि० नम—स्वार्थे णिच् वा० इष्णुच्। नमनशीले "स्थिरा चिन्नमयिष्णवः" ऋ०८।२०।१ "नमयिष्णवः नमनशीलाः" भा०।

**नमस्** अव्य० नम—भावे असुन् स्वरादि०। नमने १स्वापकर्षबोधकव्यापारे २त्यागे स्वस्वत्वध्वंसानुकूलव्यापारभेदे। पुष्पं विष्णवे नम इत्यादौ विष्णूद्देश्यकमन्त्रकरणकत्यागविषयः पुष्पमित्येवं बोधः यथाह शब्दशक्तिप्रकाशिकायाम्

"पुष्पमिदं विष्णवे नम इत्यस्य विष्णूद्देश्यक मन्त्रकरणत्यागस्य कर्मेदं पुष्पमित्यर्थस्तत्र चतुर्थ्या प्रीत्युद्देश्यत्वं तदिच्छाधीनत्वरूपं नमःपदार्थे मन्त्रकरणत्यागे बोध्यते प्रकृत्यर्थस्य च विष्ण्वादेः प्रीतौ तदिच्छायां वान्वयः। ब्राह्मणाद्युद्देश्यकस्य गवादित्यागस्य मन्त्रकरणत्वे प्रमाणाभावात् गौर्ब्राह्मणाय नम इत्यादिकोन प्रयोगः।